# छात्रस्य परीक्षा

(रवीन्द्रनाथठाकुरविरचितं नाट्यकौतुकम्)

अनुवादकः – डॉ. सुकान्त-मान्ना

**(पात्राणि)**

छात्रः- मधुसूदनः। शिक्षकः- कालाचाँदः। अभिभावकः।

**छात्रः श्रीमधुसूदनः। कालाचाँद-महाशयः आचार्यः पाठयति।**

**(अभिभावकस्य प्रवेशः)**

**अभिभावकः** – कालाचाँदमहाशय, मधुसूदनः कथम् अधीते?
**कालाचाँदः** – आम्, यद्यपि महान् धूर्तो मधुसूदनः, किन्तु सबलोऽयम् अध्ययने। कदापि द्विः अध्यापनस्य आवश्यकता एव न भवति। यत् सकृत् पाठितं मया, तत् कदापि न विस्मरति।
**अभिभावकः** – तथा वा? तर्हि अद्य अस्य परीक्षां करोमि।
**कालाचाँदः** – अवश्यं क्रियताम्।
**मधुसूदनः** – (स्वगतम्) ह्यः आचार्येण तथा ताडितं येन इदानीमपि मे पृष्ठभागे वेदना अस्ति। अद्य तस्य प्रत्यर्पणं करणीयम्। अपसारयामि एव अद्य एनम्।
**अभिभावकः** – किं रे मधो! पठितं स्मरसि खलु सर्वम्?
**मधुसूदनः** – आचार्येण उक्तं सर्वं स्मरामि।
**अभिभावकः** – तथा वा? उच्यतां तर्हि- कस्तावद् उद्भिद्?
**मधुसूदनः** – उद्भिनत्ति भूमिमिति।
**अभिभावकः** – यथा?
**मधुसूदनः** – यथा किञ्चुलुकः।
**कालाचाँदः** – (रोषकषायितनेत्रः) किम्? किमुक्तम्?
**अभिभावकः** – उपविश्यतां भोः! नोच्यतां किमपि इदानीम्।

**(मधुसूदनं प्रति)**

**अभिभावकः** – त्वया पद्यं पठितं खलु? उच्यतां तर्हि- किं प्रस्फुटति कानने?
**मधुसूदनः** – कण्टकः।

**(कालाचाँदमहाशयस्य वेत्राघातः)**

**मधुसूदनः** – किम् आचार्य! ताडयति किमर्थम्? मिथ्योक्तं वा मया?
**अभिभावकः** – अस्तु, केन कर्तितः सिराज-उद्दौला? इतिहासे किमुच्यते?
**मधुसूदनः** – कीटैः।


*dīpaśikhā*/v1/2023/Dr. Sukanta Manna/pp. 19-21

(वेत्राघातः)

**मधुसूदनः** – आम्, विना कारणं मे ताडनं भवति? न केवलं सिराज-उद्दौला, अपि तु सम्पूर्णः इतिहासः एव कीटैः कर्तितः। पश्यन्तु।

**(प्रदर्शनम्। कालाचाँदमहाशयस्य शिरोरदनम्।)**

**अभिभावकः** – स्मरति वा व्याकरणम्?
**मधुसूदनः** – स्मरामि।
**अभिभावकः** – कः कर्ता? सोदाहरणं बोधयतु।
**मधुसूदनः** – कर्ता अपरपल्ल्याः जयमुन्शीवर्यः।
**अभिभावकः** – किमर्थम् उच्यताम्?
**मधुसूदनः** – सः क्रियां करोति।
**कालाचाँदः** – (सरोषः) तव शिरः।

**(पृष्ठे वेत्राघातः)**

**मधुसूदनः** – महोदय! तन्मे पृष्ठं, न शिरः।
**अभिभावकः** – कः षष्ठीतत्पुरुषः?
**मधुसूदनः** – न जाने।

**(कालाचाँदमहाशयस्य वेत्रदर्शनम्)**

**मधुसूदनः** – अस्य ज्ञानं तु अस्त्येव, अयं यष्टितत्पुरुषः।

**(अभिभावकस्य हासः, कालाचाँदमहाशयस्य तद्विपरीतभावः)**

**अभिभावकः** – गणितशिक्षा प्राप्ता वा?
**मधुसूदनः** – प्राप्ता।
**अभिभावकः** – अस्तु, तुभ्यं सार्धषट् मिष्टान्नानि प्रदाय उक्तं यत्- पञ्चनिमेषं यावद् भक्षणानन्तरम् अवशिष्टं ते कनिष्ठभ्रात्रे प्रदेयमिति। एकस्य मिष्टान्नस्य भोजने तव निमेषद्वयात्मकः कालः अपेक्ष्यते चेद् भ्रात्रे कति मिष्टान्नानि प्रदास्यति?
**मधुसूदनः** – न एकमपि।
**कालाचाँदः** – कथम्?
**मधुसूदनः** – सर्वमहं खादिष्यामि। दातुं न शक्नोमि।
**अभिभावकः** – अस्तु, यदि एकः वटवृक्षः प्रतिदिनं चतुर्थांश-प्राङ्गुलपरिमितं वर्धते, तर्हि यो वटः अस्य वैशाखस्य प्रथमे दिवसे दश-प्राङ्गुलपरिमितः आसीत्, परवर्तिवैशाखे तस्य कीयती वृद्धिः स्यात्?

**मधुसूदनः** – यदि वक्रता आयाति तर्हि वक्तुं न शक्यते, यदि ऋजुतया उपरि गच्छति तर्हि परिमापनेनैव ज्ञास्यते, शुष्के जाते तु वार्ता एव नास्ति।

**कालाचाँदः** – विना ताडनं बुद्धिः कार्यं न करोति। निर्गतश्रीक! ताडनेन ते पृष्ठं लोहितं करोमि, तेनैव भवान् ऋजुः स्यात्।

**मधुसूदनः** – किन्तु कदाचित् ताडनाद् ऋजुरपि वक्रायते।

**अभिभावकः** – कालाचाँदमहाशय! भ्रमोऽयं भवताम्। ताडनादिना अत्यल्पः एव साध्यते। अस्त्येव लोकप्रसिद्धिः यत्- ताडनाद् गर्धवो नाश्वायते, अपि तु बहुधा अश्व एव गर्धभायते। अधिकांशाः बालाः पठने समर्थाः, किन्तु अधिकांशाः शिक्षकाः पाठने असमर्थाः। अन्ततः ताडनेन मृतो बाल एव भवति। सवेत्रदण्डं भवता प्रस्थीयताम्। तावता कानिचन दिनानि पृष्ठमस्य मधुसूदनस्य विश्राम्यतु। ततः अहमेव पाठयामि।

**मधुसूदनः** – अहो! रक्षितः।

**कालाचाँदः** – रक्षितो महाशय! अस्य बालस्य पाठनं श्रमिककर्म। कायिकश्रममात्रम्। मासं खनित्वा एनं पञ्चैव रूप्यकाणि लभ्यन्ते। तेन श्रमेण मृत्खनने तु दश रूप्यकाणि लभ्यन्ते।

